कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1974 विषय वेदांगज्योतिष
नाव. निर्णयसिंधु
लेखक/लिपीकार
पृष्ठ 34 काळ १ [✓ पूर्ण]/अपूर्ण

~~M-1975~~
M-1974

Checked 2012

स

इदं पुस्तकं निर्णयसिंधोर्द्वैयं प्रारंभ पत्राणिदं संख्या ७४

॥श्रीगणेशाय नमः॥ श्रीलक्ष्मीनृसिंहाय नमः॥ फणाहृत्यैव यन्निकेतं रामं सीतालतायुतं॥ चिन्मया
पित्रान्यचायचत्रतित्रिसपालं वशाश्रितं वंदे॥१॥ लक्ष्मीसहायं कल्पद्रुतरलं जितगोकुलं॥ ब्रह्मापी
ठं वनस्थापमं महः किंचिदुपास्महे॥२॥ वेदार्थं धर्मरक्षायै मायया मानुषरूपिणं॥ पितामहं हरिं वं
दे भट्टनारायणाख्यं॥३॥ यत्प्रसादसंस्मृतिः सर्वमंगलप्रतिरूपता॥ तान्भट्टरामकृष्णाख्यान्
श्रीतातचरणान्नुमः॥४॥ सर्वकल्याणसंदोहविदानं यत्पदद्वयं॥ गुरुदीक्षोदरीयं वामुमाख्यां
नौमि सादरं॥५॥ विंदुमाधवपादाब्जरोलंबीकृतचित्तमहं॥ ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्म
२ हे॥६॥ हेमाद्रिमाधवमतेप्रविचार्य सम्यगालोच्य तत्समयतीर्थकृतां परेषां॥ [illegible]मपकृत्सत

नयः कमलाकराख्यः कालेपयामतिविनिर्णयमातनोति॥७॥ संति यद्यपि निबंधाः सहस्रशो बंध्या
ख्यकोविदैः॥ तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते॥८॥ तत्र संक्षेपतः कालः षोढा अब्दो
यनमृतुर्मासः पक्षो दिवस इति॥ तत्राब्दो माधवमते पंचधा सावनः सौरश्चांद्रो नाक्षत्रो बार्ह
स्पत्य इति॥ गुरोर्मध्यमराशिभोगेन बार्हस्पत्यः स च ज्योतिःशास्त्रे प्रसिद्धः॥ हेमाद्रिस्तु स्मृत्योर्धर्म नि॰
शास्त्रेऽनुपयोगात्तिस्र एव विधा आह॥ तत्र वक्ष्यमाणैः सावनादिद्वादशमासैस्तैस्तै दद्वं॥
मलमासे तु सति षष्ठौदिनात्मक एको मास इति द्वादशमासत्वमविरुद्धं॥ तथा च व्यासः॥ षष्ठ्या
तु दिवसैर्मासः कथितो बादरायणेनेति॥ तत्र चांद्रो द्विधः षष्ठौभेदः॥ तदाह गर्गः॥ प्रतचोदित

वः शुक्लः प्रमोदोथ प्रजापतिः ॥ अंगिराः श्रीमुखो भावो युवा धातेश्वरस्तथा ॥ बहुधान्यः प्रमा
थी च विक्रमो वृषस्तथा ॥ चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥ सर्वजित्सर्वधारी च
विरोधी विकृतिः खरः ॥ नंदनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ हेमलंबो विलंबश्च विकारी
शार्वरी प्लवः ॥ शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥ प्लवंगः कीलकः सौम्यः साधा
रणविरोधकृत ॥ परिधावी प्रमादी च आनंदो राक्षसोनलः ॥ पिंगलः कालयुक्तश्च सिद्धा
र्थी रौद्रदुर्मती ॥ दुंदुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षय इति ॥ यद्यपि ज्योतिषे गुरोर्मध्य
मराशिभोगेन प्रभवादीनां माघादौ प्रवृत्तिरुक्ता ॥ तथापि प्रभवादीनां चांद्रत्वमप्यस्ति ॥

चांद्राणां प्रभवादीनां पंचके पंचके युगे इति माधवोक्तेः ॥ तेन चांद्रप्रभवादिश्राद्धं विधुवद्व
र्तते ॥ बार्हस्पत्यस्तु माघादौ तथोर्ध्वविनियोगो ज्योतिर्निबंधे ब्रह्मसिद्धांते ॥ एकसद्धाभेदेपि
षे कालः स्वस्वादिकर्मसु ग्राह्यः सर्वत्र तत्रापि जैवो माघ नर्मदोत्तरे ॥ आर्ष्टिषेणादिमुख्यः
त्र कर्मादौ चांद्रसंवत्सरं सदा ॥ नास्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता ॥ [illegible]दीनां च
सौरर्तु च पालयेत् ॥ सौरर्तुनिर्णयं प्रदिष्टमयनमिति दीपिकोक्तेः ॥ तद्धि विक्रांतिपौर्णि
तरं चैति कर्म्यं संक्रांतिर्दक्षिणं ॥ मकरे संक्रां ॥ अथायनयोर्विनियोगमाह मदनरत्ने ब्राह्म
देवतारामयाप्यादि प्रतिष्ठोदगुत्तरायणे ॥ दक्षिणायनमुख्ये पुर्ये च नकर्मेसु दर्शोत्तरायणेति

वि०सिं०प्र
॥ ॥३॥

वैखानसः॥ मासैर्वैरवधाराहनरसिंहत्रिविक्रमाः॥ महिषासुरहंत्र्यास्यस्य
वैशाखेष्वपर्यौनतुदक्षिणायनेएवेतिनियमः॥ पूर्वेवचनेदक्षिणायनेनिषिद्ध
याः देवविशेषप्रतिप्रसवमात्रात्॥ रत्नमालायां॥ गृहप्रवेशत्रिदशप्रतिष्ठा
ने व्रतबंधपूर्वं॥ सौम्यायनेकर्मशुभंविधेयंयद्गर्हितंतत्खलुदक्षिणेचेति॥ अस्या
दे॥ सदाकृतयुगंचास्तुसदाचास्तूत्तरायणं॥ सदामहोदयश्चास्तुकार्ययांनि
सवने॥ ऋतुर्मासद्वयात्मामलमासेतुमासद्वयात्मकएकोमासस्तेनमासद्वय
सद्वया॥ चांद्रः सौरश्च॥ चैत्रारंभोयसंज्ञादिश्चांद्रः॥ मीनारंभोमेषारंभो

षयोर्मेषवृषयोर्वावसंतइतिबोध्यान्तोतेः॥ अनयोर्विनियोगमाहत्रिकांडमंड
क्रियाः सर्वाः कुर्याच्चांद्रमसर्तुषु॥ तदन्याचेतुसौरर्तुष्वितिज्योतिर्विदांमतं॥ स
वसंतोग्रीष्मोवर्षाः शरद्धेमंतः शिशिरइति॥ इतिऋतुः॥ मासश्चतुर्विधः॥ स
द्रोनाक्षत्रइति॥ त्रिंशद्दिनः सावनः॥ अर्कसंक्रांतेः संक्रांत्यवधिः सौरः॥
संक्रांतिनिर्णयउच्यते॥ तत्रपूर्वतोपिपरतोपिसंक्रमात्पुण्यकालघटि
स्यतः पुण्यकालः सर्वैरुक्तः॥ विशेषतस्तूच्यते॥ अत्रपामकाः संग्रहश्लो
दशपूर्वतः षोडशनिस्तद्धराः पूर्वतः त्रिंशन्मोडशपूर्वतोपरतः पूर्वो

॥४॥नि॰सिं॰प्र

ऽशाश्चोत्तरा ऋतुत्रयः पश्चात्तथैवतः पुनः पूर्वाः षोडशाश्चोत्तराः पुनरथो पुण्य
स्यार्थः॥मेषप्रागूर्ध्वं च दशघटिकाः पुण्यकालः॥वृषे पूर्वाः षोडश॥मिथुने प
राः त्रिंशत्॥सिंहे पूर्वाः षोडश॥कन्यायां पराः षोडश॥तुलायां प्रागूर्ध्वं दश॥वृ
षोडश॥धनुषि पराः षोडश॥मकरे चत्वारिंशत्पराः॥इदं च हेमाद्रिमतेनो
त्र पराविंशतिः पुण्याः॥कुंभे पूर्वाः षोडश॥मीने पराः षोडशेति॥पाप्लुतरापु
सार्धं त्रये स्याद्यदि सापि पूर्वा॥पूर्वा तु यो त्काय दि साधिकाते सा पुत्तरा रात्रि
अर्वाग्निशीथाद्यदि संक्रमः स्यात्सूर्येन्दुपुण्यं परतः परेह्नि॥आसन्नयामप्र

पदं॥न्युयुक्तमित्युक्तं॥अत्र च पिंडरहितं श्राद्धं कुर्यात्॥तथा चापरार्के माहेय॥अयनद्वितये श्राद्धं विषुवद्वि
तये तथा॥संक्रांतिषु च सर्वासु पिंडनिर्वपणाद्दतेऽ इति॥श्राद्धं स्वल्पपातिस्वस्य निर्मलत्वात
ततः प्रत्नतिसंक्रांतावुपरागादिपर्वसु॥त्रिपिंडमाचरेच्छ्राद्धं एकोद्दिष्टं मृताहनीति माहे
म हय व त्वियिकल्प एवेसाह॥तत्र॥अस्य पार्वणत्वं विधायत्वेन पिंडविधायकत्वात्॥पिं
अन्यथैव पदे पिंडानुवादे त्रिस्त्वविधौ च प्रथम न त्वस्य वैरूप्यापत्तेः॥तथा चोत्तरप
यो हि तं पार्वणत्वं वर्त्तं तदिस्तिड नयचचक्रौरर्थः॥त्रिपिंडश्राद्धे नैकोद्दिष्टं व्यावर्त्तनमा
विशेषमाह ज्योतिर्निबंधे गार्ग्यः॥स्नाज्याः सूर्यस्य संक्रांतेः पूर्वतः परत

॥८॥नि.सिं.

त्रैरजनीसिद्धार्थकल्कोऽप्य संयुतैः॥ स्नानं जन्मर्क्षगते रविसंक्रमणे नृणां स्तुतंद
त्रियुग्मं स्याद्वादशो चेद्वासरद्वये॥ संक्रांतिः पक्षिणीज्ञेया द्वाभ्यामयनकर्मसु॥ प
पक्षयोरंत्ये द्वादश्यां श्राद्धवासरे॥ सायंसंध्यां न कुर्वीत कुर्वंश्चेत्पितृहा भवेदिति स्मे
सोतेः॥ सायंपुण्यकाले संध्यानिषेधमाहुस्तन्निर्मूलं॥ अन्ये त्वयनद्वयेपि स्तरस्त्रीते ने
तिसंक्रांतिनिर्णयः॥ पक्षयुग्मं चांद्रो मासः॥ स द्वेधा॥ शुक्लादिरमांतः कृष्णादिः पूर्णि
मांतश्चेति कांडमंडनः॥ चांद्रोपि शुक्लप्रतिपदादिः कृष्णादिर्वेति च द्विधा स शुक्लादिर्देशभेदेन तद्व्यवस्था
जी माह॥ कृष्णपक्षादिकं मासं नों कुर्वीतेति केचन॥ येपीदंति नते पापपीष्ठाद्विंध्यस्य दक्षिणा इति॥

॥८॥

---

विंध्यस्य दक्षिणे कृष्णादिर्निषेधादुत्तरतो द्वयोरप्यनुज्ञा गम्यते॥ तत्रापि शुक्लादिर्मुख्यः कृष्णादिर्गौ
णः॥ शास्त्रेषु चैत्रशुक्लप्रतिपद्येव चांद्रसंवत्सरारंभोक्तेः॥ तदुक्तं दीपिकायां॥ चांद्रोब्दो मधुशु
क्लप्रतिपदारंभ इति॥ नहि ये कृष्णादिं मन्यंते॥ तेषां वत्सरारंभो भिद्यते॥ अतः शुक्लादिर्मुख्यः
कृष्णादिना मलमासासंभवाच्च॥ चंद्रस्य सर्वनक्षत्रभोगेन नाक्षत्रो मासः॥ सावनादीनां व्य
वस्थोक्ता॥ हेमाद्रौ ब्रह्मसिद्धांते॥ अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु॥ संक्रांतिपौर्णि
मासी स्यात्तथैव नृपवैश्ययोः॥ अत्र ब्राह्मणादीनां यच्चनांतरेणापत्रकर्मविशेषेय संते ब्राह्म
णोग्निमादधीतेत्यादिवन्मासउक्तस्तत्र श्रौतस्य मात्रं विषयम्यते॥ न तु सर्वकर्मसु दर्शांतएवेति

वृष्ट्याद्यर्थे सौत्रे रेहीषादिनिष्पन्ननियमवद्विधिलाघवात्।। त्रैवर्णिकानां सर्वकर्मसु मासविशेष
विधेः सावनादीनां श्रद्धानुलोमादिपरत्वापत्तेश्चेति गुरुचरणाः।। ज्योतिर्गर्गः।। सौरो मासो वि
वाहादौ यज्ञादौ सावनस्मृतः।। आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते।। ऋष्यशृंगः।। विवा
सं ह व्रत यज्ञेषु सौरं मानं प्रशस्यते।। पार्वणे त्वष्टकाश्राद्धे चांद्रमिष्टं तथाब्दिके।। स्मृत्यंतरे।। एकोद्दि
ष्टे विवाहादौ ऋणादौ सौरसावनौ।। ज्योतिर्गर्गः।। आयुर्दायविभागश्च प्रायश्चित्तक्रियात
था।। सावनेनैव कर्तव्याः शत्रूणां चाप्युपासना।। विष्णुधर्मे।। नक्षत्रसत्राण्ययनानि चेंदोर्मा
सेन कुर्याद्द्रुगणालवेनेति।। ब्राह्मे।। तिथिवृत्से च चरुस्नादिं व्रतेष्टकृत्यादिषु च च।। विवाहादौ च

सौरादिं मासं कृत्ये विनिर्दिशेत्।। अथ मलमासः।। तत्रैकमाससंक्रांतिरहितः सितादिश्चांद्रो मासो
मलमासः।। एकमात्रसंक्रांतिराहित्यम संक्रांतत्वेन संक्रांतिद्वयवत्वेन च भवतीति मलमासो
द्वेधा।। अधिकमासः क्षयमासश्चेति।। तदुक्तं काठकगृह्ये।। यस्मिन्मासे न संक्रांतिः संक्रांति
द्वयमेव वा।। मलमासः विज्ञेयो मासस्यात्तु त्रयोदशाऽइति।। सत्यव्रतोपि।। राशिद्वयं यत्र मासे
रः संक्रमेत द्वियार्कः।। नाधिमासो न वेदेष मलमासस्तु वै चलमिति।। अधिकमासस्य कालनि
यममाह।। वसिष्ठः।। द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।। घटिकानां चतुष्केण पत
त्यधिकमासकः इति एतच्च सन्नयार्थं नतु नियमार्थं।। अन्यथा षोडशादिनाधिकद्वात्रिंश

न्मासांतरे कृष्णपक्षनियमेन शुक्लादित्वं गणपतेः ॥ तेन स्फुटाधिककाले मलमासपातेपि
न दोषः अत एवोक्तं माधवीये मासे त्रिंशत्तमे न वेदिति ॥ क्षयस्यापि ज्योतिःशास्त्रे ॥ असंक्रांति
ते मासोधिमासः स्फुटः स्याद्द्विसंक्रांतिमासः क्षयाख्यः कदाचित् ॥ क्षयः कार्तिकादित्रये नान्य
तः स्यात्तदा वर्षमध्येधिमासद्वयं च ॥ एकः क्षयात्पूर्वं परतश्चैकः स्यादधिमासद्वयं भवती
त्यर्थः ॥ अत्र विशेषमाह जाबालिः ॥ मासद्वयेब्दमध्ये तु संक्रांतिर्न यदा भवेत् ॥ प्राकृतस्त
त्र पूर्वः स्यादधिमासस्तथोत्तर इति ॥ उत्तर एव चक्रा[illegible]धिकं न पूर्वस्मिन्नित्यर्थः ॥ यत्तु ब्रह्म
सिद्धांते ॥ चैत्रादर्वाङ्नाधिमासः परतस्त्वधिको न वेदिति ॥ यच्च ज्योतिःसिद्धांते ॥ यदप्यन्या
ग

---

ते सर्वेष्वधिके वाप्यचिंति ॥ मकरे वाथ कुंभे वा नाधिमासो विधीयत इति ॥ तत्क्षयपूर्वभा
व्यधिमासस्य कालत्वेपि क्वचिन्निषेधार्थं ॥ न त्वधिकमात्रस्य ॥ दर्शानां फाल्गुनादीनां प्रायो माघस्य
चाधिपत ॥ नतुं सत्यत्वे भवतीत्येष शास्त्रविनिश्चयपरतिहेमाद्रौ विष्णुधर्मविरोधात् ॥ मलमा
सेष्टकादिनिषेधानुपपत्तेश्च मकरे वाथ कुंभे वेति दृष्टांतार्थं प्राप्तमायात ॥ क्षयस्यागम
न काल उक्तः सिद्धांतशिरोमणौ ॥ गतोब्ध्यद्रिनंदैर्मिते शाककाले तिथीशैर्भविष्यत्यथांगाक्षसू
र्यैः ॥ गजाद्र्यग्निभूमिस्तथा प्रायशोयं कुवेदेंदुवर्षैः क्वचिद्गोकुभिश्चेति ॥ अब्धयश्चत्वारः
अद्रयः सप्त ॥ नंदाः नव ॥ एवं प्रातिलोम्येन पाते ९७४ ॥ तैर्मिते वर्षेस्मिन्नरक्षयमासः

पूर्वं ज्ञातः संसर्पः॥ तिथयः पंचदश॥ ईशाः एकादश॥ ११५॥ एवं मिते याते वक्ष्मिद्भविष्यती स
र्पः॥ अंगाः ६ अक्षाः ५ सर्पः २२ एकत्र २२५६ गजाः ८ अद्रयः ७ अग्निः ३ भूः १ एकत्र १३७८ कुः १
वेदाः ४ इंदुः १ एकत्र १४१ गावः ९ कुः १ एकत्र १९ एतैर्मितै वर्षे याते वक्ष्मिद्भविष्यती सर्पः
अथ मलमासे कार्याकार्यं निरूप्यते॥ तत्र जाबालिः॥ निसंये नैमित्तिके कुर्यात्प्राप्तं कुर्यान्म
लिम्लुचे॥ तिथि नक्षत्र वारोक्तं काम्यं नैव कदाचन॥ अयं च कर्मनिषेध उक्तारंभ [illegible] स मासे वि
षयः॥ असंर्पोनामयेमासानंतेषु मलसंमतः॥ प्रतानां चैव पक्षानां मारंभस्य समापन
मिति ते नैवोक्तं स्यात्॥ असर्पो अधिक मासाः संसर्पः॥ तत्र मंडलं तपते रवेरिति च वचनात्॥

कारीर्यादेः काम्यस्य त्वारंभ समाप्ती न भवत एवेत्यादिरन्यत्र विस्तरः॥ काठकगृह्येपि॥ मलेनन्य
ति
णा
गतिं कुर्यान्निसंत्ये नैमित्तिकीं क्रियां॥ तानि नैमित्तिकानि कीक्षिप्ति काम्यानुक्तानि॥ यं नैमित्तिकं प्रति
नष्टमनुगतान्याधानमर्चासुधासंस्कारादिविलोपने सति पुनः प्रोक्तं प्रतिष्ठादिकमिति॥ गृहे
तरघुलंतुस्तोमादिर्हेयमेव॥ तत्र कर्तव्यान्युक्तानि कालादर्शे॥ द्वादशाहे सपिंडीतं कर्मण्वहल्य
म्नये॥ सीमंते पुंसवे श्राद्धं छावेतो जातकर्म च॥ रोगशांतिरलब्धेच योगे श्राद्धं व्रतानि च॥ प्रा
यश्चित्तं निमित्तस्य वशान्नित्यं परत्र च॥ अहोदकं तु अमन्यादि माहाल्यपयुगादिषु॥ श्राद्धं दर्शोप्य
हरहः श्राद्धमलादि माश्विवं॥ मलिम्लुचाख्य मासेषु मृतानां श्राद्धमाद्धिकं॥ श्राद्धं तु प्रथमं दशेषुती

येश्वेन ग्रहणादिषु॥ कन्यादिषु च यद्दानं दानं दैनंदिनं च यत्॥ तिलगोमहीहिरण्यानां संप्रोपासन
योः त्रिया॥ पर्वद्वौ श्राद्धयत्नं सागरेरेद्धिश्च पर्वणि॥ निराग्निहोत्रहोमश्च दैवतातिपूजनं॥ स्ना
नं च स्नानविधिर्नाम्न स्नापेयवर्जनं॥ तर्पणं यानि निमित्तस्य निस्म स्नादुत्र यत्र चेति॥ एतौ पुं
सवनसीमंतौ॥ एतस्य गर्भाधानाद्यन्नप्राशनांत संस्कारोपलक्षणं॥ तदुक्तं दीपिकायां॥ गर्भा
धानपुंसवनचौलविधितः प्राक्स्नातयागंपि नाद्रष्टैश्चास्वयलंगजेंद्रपुरतः यायामध्यान्ते
गयोस्तीर्थे दुस्तयघोत्रपित्र्यमध्ये चे मास्येव यात्रान्तरेद्धिति॥ अलभ्ये योगे दुर्लभे दयपमकादे
कान्यान्यपि प्रेतादीनि कार्याणीत्यर्थः॥ पूर्वपरत्रैपलेश्रुतैश्चेत्यर्थः॥ महालयश्राद्धेनमध्यान्ते

॥१२॥

कादश्युच्यते इति माधवः॥ दर्शश्राद्धं मलेपि कार्यं यत्तु कृष्णपक्षांगः॥ संवत्सरान्तरे वेलामासो
यं स्यात्कलिम्लुचः॥ तस्मिंस्तयोर्दर्शश्राद्धं न कुर्यादिंदुसंक्षय इति लक्षणदर्शश्राद्धविषयं॥
काम्यं नैव कुर्यादित्येति वचनात्॥ दर्शे च काम्यश्राद्धं कृत्वं च स्याद्येदिनक्षये स्यादिनायाऽस्य च
ल्पकालो ते॥ निरसं तु मलेन वसेन च॥ दर्शोप्य हरहः श्राद्धं दानं च प्रतियासरं॥ गोभूतिलहिर
ण्यानां मासेपि स्यान्मलिम्लुच इति माहात्म्ये ते रितिहेमाद्रयः॥ द्वितो दासीपेपि॥ अग्निहुरि
दुपूर्ती च हरिवारोतु धाष्टमी॥ नान्द्रिमासे परित्याज्याः सीमंतोन्नप्राशनेष्ट्रिज्ञोरिति॥ अग्निहुदं
र्तः॥ द्विविधमप्यमाश्राद्धं न कार्यमिति तत्व परार्थः॥ तत्र पद्धिहितं च मठत्तरे माद्धिकारयेदिस्तेः

षष्ठ्यां तु दिवसे रिति शुद्धमास एव रतोपि शास्त्रार्थोपपत्तेर्दर्शश्राद्धं मलेन कार्यं॥इति प्राचीनगौ
डाः॥शूलपाणिश्च॥संवत्सरप्रदीपेपि॥एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत्॥दर्शश्राद्धं त
दैकस्यात्परत्र मलिम्लुचे॥अत्रापि प्राग्वद्व्यवस्था॥यद्यपि कालादर्शे सर्वं वार्षिकं मास
हेमाद्रि द्वये कार्यमित्युक्तं तथापि माध्यवापरार्कादिमतात्प्रथमवार्षिकं त्रयोदशे मलमासे द्वितीयादि [illegible] वा
कं तु शुद्धमास एव कार्यं॥असंक्रांतेपि कर्तव्यमाब्दिकं प्रथमं द्विजैः॥तथैव मासिकं श्राद्धं सपिंडी
करणं तथेति हारीतोक्तेः॥आब्दिकं प्रथमं यस्यात्तत्कुर्वीत मलिम्लुचे॥चतुर्दशे तु संप्राप्ते कुर्वीत
पुनराब्दिकमिति सत्यव्रतोक्तेश्च॥पुनराब्दिकं द्वितीयादिवार्षिकं त्रयोदशो मासैतीते चतुर्दशा

यदिने कुर्यादित्यर्थः॥यत्तु सत्यव्रतः॥वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि॥मलमासे न तत्का
र्यं व्याघ्रस्य वचनं यथेति॥तद्द्वितीयादिवार्षिकविषयं॥आब्दिकं प्रथमं यस्यात्तत्कुर्वीत मलिम्लु
चे इति पूर्वोक्तवचनात्॥यत्र द्वादशमासिकं शुद्धमासे भवति तत्र त्रयोदशेधिके एवाब्दिकं कार्यं॥
यत्र त्वधिकमासे द्वादशमासिकं तत्र तस्य द्विरावृत्तिस्तस्याश्चतुर्दशे शुद्धे एव प्रथमाब्दिकमिति
निष्कर्षः॥तेन द्वितीयादि शुद्धमास एव॥पृथ्वीचंद्रोदये दिवोदासीये मदनपारिजाते चैवं॥
मलमासमृतानां तु यदा स एवाब्दिकः स्यात्तदा तत्रैव कार्यं॥यदाह पैठीनसिः॥मलमासेमृ
तानां तु श्राद्धं यत्प्रतिवत्सरं॥मलमासेपि कर्तव्यं नान्येषां तु कथंचनेति यत्तु वृद्धवसिष्ठः॥आ

॥१५॥ति॰सिं॰

द्वीर्ये हनि संप्राप्ते अधिमासो भवेद्यदि ॥ मासद्वयेपि कुर्वीत श्राद्धमेवं न मुह्यति ॥ यमव्यासः ॥
उत्तरे दैवकार्याणि पितृकार्याणि चोभयोरिति तन्मासिकादिविषयं ॥ योगादिवं मासिके च श्रा
द्धं चापरपक्षिकं ॥ मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रिकोक्तेः ॥ तैर्थिकं ति भ
र्थश्राद्धं तच्च मासद्वयेपि कार्यमिति त्रिस्थलीसेतौ दृढः केचित्तु ॥ प्रतिमासं मृताहे च श्राद्धं
यत्प्रतिवत्सरं ॥ मन्वादौ च युगादौ च तन्मासोरुभयोरपीति मरीचिवचनात् ॥ वर्षे वर्षे तु य
च्छ्राद्धं मातापित्रोर्मृतेहनि ॥ मासद्वयेपि तत्कुर्याद्व्याघ्रस्य वचनं यथेति गालवोक्तेश्च प्रसा
द्धिकं मासद्वये कार्यमित्याहुः ॥ तत्तु यं प्रतिमासं मृताहे क्रियमाणं मासिकं ॥ प्रतिसंवत्सरं क्रिय

॥१५॥

---

र्थं पात्रविधिः संक्रमणे च शास्त्रांतरे स्फलं बहुना ॥ मलमासे व्रतविशेष उक्तो हेमाद्रौ पाद्मे ॥ अधिमासे तु संप्रा
प्ते गुडसर्पिर्युतानि च ॥ त्रयस्त्रिंशदपूपानि दत्वाप्नोति दिने दिने ॥ सश्यानि समुपि श्राधि ॥ अधिमासे न पौरु
म ॥ अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः ॥ उद्दिश्यापूपदानेन पृथ्वीदानफलं भवेत् ॥ त्रयस्त्रिंशद
पूपान्नं कांस्यपात्रे निधाय च ॥ सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् ॥ विष्णुरूपी सहस्रांशुः सर्व
पापप्रणाशनः ॥ अपूपान्नप्रदानेन मम पापं व्यपोहतु ॥ नारायण जगद्बीज भास्कर प्रतिरूपक ॥ व्रते
पस्य नानेन पुत्रांश्च संपदं चापि वर्द्धय ॥ विष्णुर्हंसो गदा चक्री गरुडो यस्य वाहनं ॥ शंखः करतले यस्य स मे वि
ष्णुः प्रसीदतु ॥ कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥ यो वंचयति भूतानि तस्मै कालात्मने नमः ॥

यं कुरुक्षेत्रमर्कदेशाः कालः पर्वद्विजो हरिः ॥ पृथ्वीसमपि मंदानं महाफलपुरुषोत्तम ॥ मलमासे च विशुध्यर्थं पापप्र
शमनाय च ॥ पुत्रपौत्राभिवृध्यर्थं तव दास्यामि भास्कर ॥ मंत्रेणानेन यो दद्यात्त्रयस्त्रिंशदपूपकान् ॥ प्राप्नो
ति विपुलांल्लक्ष्मीं पुत्रपौत्रादिसंपद इति ॥ इति श्रीभट्टकमलाकरकृते निर्णयसिंधौ त्वयमासमलमासनि
र्णयः ॥ पक्षनिर्णयस्तु द्वेधैव मुख्यः शुक्लपक्षः कृष्णपक्षः पित्र्ये विशिष्यते इति माधवेनोक्तेः ॥ अथ तिथि
निर्णयः ॥ तत्र तिथिर्द्वेधा शुद्धा विद्धा च दिने तिथ्यंतरसंबंधरहिता शुद्धा ॥ तद्रहिता विद्धा ॥ तत्र शुद्धा
यामसंदेहाद्वेधो निर्णीयते ॥ तत्र सामान्यतो वेधमाह माधवीये पैठीनसिः ॥ पक्षद्वयेपि तिथयस्तिथिं पू
र्वां तथोत्तरां ॥ त्रिभिर्मुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृत इति ॥ हेमाद्रिमदनरत्नादौ तु द्विमुहूर्तोप्युक्तः ॥

॥१९॥

पात्रेतु ४

उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ॥ द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति विष्णुधर्मोक्तेः ॥ द्वि
मुहूर्तवेधश्चानुकल्पः ॥ द्विमुहूर्त्तापि या कर्त्तव्या या तिथिर्वृद्धिगामिनीति दक्षेणापि शाठ्योक्तेः ॥ अयं वेधः
वेधः प्रातरेव ॥ सायं तु त्रिमुहूर्त्त एव ॥ यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः ॥ सा तिथिस्तद्दिने प्रोक्ता त्रि
मुहूर्त्तैव यात्र चेदिति स्कांदोक्तेः ॥ दीपिकायां ॥ त्रिमुहूर्त्तगा तु सकला सार्थैः इति ॥ अत्रोपवासस्नानादौ घटि
कैकापि ग्राह्येति ॥ उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके इत्यादीनि स्कांदादिवचनानि सावित्र्ये ध्यान
शल्यकरणन्यायेन अयमयं वस्तु सात्रिमुहूर्त्तप्रवेशे सापराह्णि ॥ तिथिविशेषे च विशेषः स्कांदे ॥ नागो
द्वादशनाडीभिर्दिक्पंचदशभिस्तथा ॥ भूतोष्टादशनाडीभिर्दूषयंत्युत्तरां तिथिमिति ॥ अयं चोपवा

सातिरिक्तविषय इति वक्ष्यते ॥ इति केचित् ॥ तत्र सर्वा तिथिर्यद्दहः कर्मकालव्यापिनी सैव ग्राह्या ॥ कर्मणो यस्य
यः कालस्तत्कालव्यापिनी तिथिः ॥ तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति विष्णुधर्मोक्तेः ॥ दिनद्वये
तद्व्याप्तावव्याप्तावेकदेशव्याप्तौ वा युग्मवाक्यान्निर्णयः ॥ तस्य पूर्ववाक्येनोपपत्तेः कर्मकालस्य मध्यांग
त्वाच्च युग्मवाक्यं तु निगमे ॥ युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः ॥ रुद्रेण द्वादशी युक्ता चतुर्दश्या
च पूर्णिमा ॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं ॥ एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमि
ति ॥ अत्र रंध्रांताः शब्दाः द्वितीयादिनवम्यंततिथिवाचकाः ॥ रुद्र एकादशी ॥ द्वितीया तृतीया
युता सा च द्वितीयायुतेति समयुग्मानीत्यर्थः ॥ इदं च शुक्लपक्षे ॥ अमा प्रतिपद्युग्मस्य पूर्णिमा

यस्तूपवासेन्न उपवासफलं लभेत् ॥ भक्ष्यं च तत्रैवोक्तं ॥ नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरम
थांबु चाज्यं ॥ यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेत्युक्तं ॥ तत्र दशमीवेधो द्विधा ॥
अरुणोदयवेधः सूर्योदयवेधश्चेति ॥ आद्यो गारुडे ॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ॥
नैवोपोष्यं वैष्णवेन तद्दिने एकादशीव्रतमिति ॥ अरुणोदयस्वरूपं च माधवीये स्कांदे ॥ उदयात्प्राक्
चतस्रस्तु घटिका अरुणोदय इति ॥ यदपि उदयात्प्राग्यदा विप्र मुर्तद्वयसंयुता ॥ संपूर्णैकादशी ना हू
म तत्रैवोपवसेद्गृहीति गारुडसौरधर्मादिवचनं ॥ यत्तु भविष्ये ॥ आदित्योदयवेलायाः प्राङ्मु
हूर्तद्वयान्विता ॥ एकादशी तु संपूर्णा विद्धान्या परिकीर्तितेति ॥ तदप्युपसंहारन्यायेन दंडचतु उ
ष्टयपरमेव ॥ हेमाद्रावप्येवं ॥ यत्तु ब्रह्मवैवर्ते ॥ चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ॥

॥ ७ ॥ ति॰ नि॰

चतुष्षष्टिविभागोत्र वेधादीनां निरूपितः ॥ अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयं ॥ अतिवेधो द्वि
घटिकः प्रभासंदर्शनाद्रवेः ॥ महावेधोपि तत्रैव दृश्यतेर्को न दृश्यते ॥ तुरीयस्तत्र विहितो योगः सूर्यो
दये बुधैरिति ॥ तद्दृष्यवचनवद्वारा अरुणोदयवेधविशेषपरमेवेति माधवीये मदनरत्नेपि ॥ अंसत्सू च
दयवेधः ॥ तथान्येपि हेमाद्रौ माधवीये च नारदः ॥ उदयात्प्राक् मू त्रिघटिका व्यापिन्येकादशी यदा ॥ सं
मुहूर्तेन
स्योपि वेधो
धर्मवृद्धये
दिग्ध्येकादशी नाम वर्ज्यं पंचधर्मकांक्षिभिः ॥ उदयात्प्राङ्मुहूर्तेन व्यापिन्येकादशी यदा ॥ संपूर्णैकाद
शी नाम वर्ज्यं पंचधर्मवृद्धये ॥ हेमाद्रौ ॥ रात्रेरंत्योष्टमो भागो ह्यरुणोदय उक्तः ॥ निशः प्रांते तु यामार्द्धं देव
सादिक्षानादने ॥ सारस्वतान्वयने चारुणोदय उच्यते ॥ इति स्मृतेः ॥ अत्रैव ॥ एवं सर्वपक्षाणां
मुहूर्तद्वयेनैकोडीसा रात्रिशः प्रांते इति वचनान्यस्य रात्रिमानवशात्सार्धत्रिदं उदयानेकेरुणोदयाः ॥

॥ ७ ॥

---

तदाह हेमाद्रिः ॥ सार्द्धघटिकात्रयोक्तिरष्टाविंशतिघटिमानरात्रिविषया ॥ महत्तरास्तु रात्री
रपेक्षया चतस्रो घटिका इत्युत्तमि साहुः ॥ तन्न ॥ अरुणोदयशब्दस्यानेकार्थतापत्तेः ॥ नच
मुहूर्तद्वयमर्थः ॥ इदं उदये पूर्वमुहूर्तादिवेधानां तथात्वानुपपत्तेः ॥ नहि तेषां यामार्द्धत्वमरुणोदय
त्वं वास्ति मुहूर्तद्वयस्य यामार्द्धस्य च साम्याच्च चतस्रो घटिका इत्यनेनोपसंहाराच्च न तदर्थः ॥
वच सार्द्धं तु घटिकात्रयमित्यनेनापि तदापत्तिः शंक्या ॥ तेन चतुर्विधदंडस्येनोक्तेः ॥ चतु
दंडार्द्धघटीदशमीसत्वेहि वेधस्तदर्थः ॥ द्विघटिकादेस्तद्योगाच्च ॥ यत्तु मतं विपताऽरुणो
दयवेधस्यपेक्षायां सार्धघटिकात्रयत्रियमादरुणोदये र्धघटिकालोन्यूनदशमीसत्वेन
दोष इति तत्तुच्छं ॥ अर्द्धदंडादावपि तदापत्तेः ॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ॥ नैवोपोष्यं

वैष्णवेन तद्दिनेकादशीव्रतमिति गारुडे ॥ नविद्धे च योगदानात्रिनिषेध्यात् ॥ नारदीयेपि ॥ लववेधेपि वि-
प्रेंद्र दशम्यैकादशीं त्यजेत् ॥ सुरया बिंदुना स्पृष्टं गंगांभ इव निर्मलं ॥ स्कांदेपि ॥ कलाकाष्ठादिमात्रेव दृ-
श्यते दशमी विधौ ॥ एकादश्यां न कर्तव्यं व्रतं राजन् कदाचनेति ॥ माधवोप्याह ॥ सोयं कालादिवेधो-
ऽरुणोदयवेधे सूर्योदयवेधे च समान इति ॥ निगमेपि ॥ सर्वप्रकारवेधोयमुपवासस्य दूषक इति ॥
अत एव माधवेनारुणोदयाख्यदंडेल्पदशमीस्पर्शे संपृक्ता ॥ वृहन्नचपयीयोगे संदिग्धा ॥ मुहूर्तव्याप्तौ
संयुक्ता उदये संकीर्णेत्युक्ता ॥ अरुणोदयवेलायां दशमी यदि संगता ॥ संपूर्णैकादशी तां तु मोहिन्यै
दत्तवान्प्रभुरिति गोभिलकात्युक्तेः ॥ पूर्वोक्तगारुडादेश्च सामान्यतो विशेषतश्चारुणोदयवेधो निषिद्धः ॥
यत्तु दशम्या गोरुणोदय इति हेमाद्रिणोक्तं ॥ यच्च महत्तरारात्रिरिति ॥ तन्मूरमतं स्वपक्षेपि दूषितं ॥ अं ॥४१॥

तेषूक्तवेधतारतम्यं च दोषतारतम्यादुपपद्यत इति दोषतारतम्यं च प्रायश्चित्ततारतम्यादवगम्यते ॥
तच्चोक्तं हेमाद्रौ स्मृत्यंतरे ॥ अज्ञानाद्यदि वा मोहात्कुर्वन्नेकादशीं नरः ॥ दशमीशेषसंयुक्तां प्रायश्चित्तमि-
दं चरेत् ॥ रूप्यपादं नरश्शीर्णां गां च दद्यात्सवत्सकां ॥ सुवर्णस्यार्धकं देयं तिलद्रोणसमन्वितं ॥ विप्राणां
तरं तत्रैव ॥ आलस्येनोजयेत्रिंशत्कां च दद्यात्सवत्सकां ॥ सुवर्णस्यार्धकं देयं तिलद्रोणमथापि वेति ॥ पर
अत्र वेधतारतम्याद्व्यवस्थेति हेमाद्रिः ॥ निशाः क्रांते इत्यपि दोषाधिक्यार्थमेव ॥ तस्माच्चतुर्घटिका-
त्मक एवारुणोदय इति सिद्धं ॥ तेन षट्पंचाशद्दंडानंतरं दशमीप्रवेशोरुणोदयवेध उक्तो भवति ॥ अं-
कु शेपि तत्रैव कृत्वैनोतः ॥ उदयात्परिविद्धा तु दशम्यैकादशी यदि ॥ दानवेभ्यः प्रीणनार्थं दत्तवान्पाक-
शासन इति स्मृत्यंतरेपि ॥ दशम्याः शेषमादाय यस्योदेति दिवाकरः ॥ तेन स्पृष्टं हरिदिनं दत्तं जंभासु-

४ चर्म ४

रात्रावपीति॥ तत्रारुणोदयवेधो वैष्णवविषयः॥ तद्वाक्येषु वैष्णवग्रहणात्॥ तत्स्वरूपं तु माध
वीये स्कांदे॥ येस्यात्र साध्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः॥ परमापदमापन्नो हर्षे वा समुपस्थि
ते॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ समात्मा सर्वभूतेषु निजाचारादविच्युतः॥
विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते इति विष्णुपुराणे॥ न चलति निजवर्णधर्मतो यः सममति
रात्मसुहृद्विपक्षपक्षे न हरति न च हंति किंचिदुच्चैः सितमनसं तमवैहि विष्णुभक्तमिति॥ अ
न्येषामतिप्रसक्तेर्व्यभिचाराद्वैष्णवदीक्षावत्त्वमेव वैष्णवत्वं यद्यपि॥ पित्रादेरागमदीक्षायां
तन्मात्रस्य वैष्णवत्वं न तु पुत्रादेः॥ तथापि स्वपारंपर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यंते
वृद्धाः॥ तच्च सागरे न विद्धो॥ यथा शुक्लात यावद्व्याप यावद्व्यालात थेतरा॥ तुल्येते मन्यते य

स्तु स वै वैष्णव उच्यते॥ केचित्तु दशम्यां नवमीवेधमपि त्यजंति तत्र मूलं मृग्यं॥ उदयवेधस्तु परि
शेषात् स्मार्तगोचरः॥ तदाह माधवः॥ अरुणोदयवेधोत्र वेध्यः सूर्योदये तथा॥ उक्तौ द्वौ दशमी
वेधौ वैष्णवस्मार्तयोः क्रमात्॥ हेमाद्रिस्तु केषांचिदर्धरात्रेपि दशमीवेधमाह॥ अर्धरात्रे तु
केषांचिद्दशम्या वेध इष्यते॥ कपालवेध इत्याहुराचार्या ये हरिप्रियाः॥ नैतन्मम मतं यस्मा
त्रियामा रात्रिरिष्यते॥ इति ब्रह्मवैवर्तात्॥ अस्यार्थः॥ अनद्यतने लुङीत्यत्रातीतायाः रात्रेः
पश्चिमं यामद्वयमागामिन्याः रात्रेः पूर्वं यामद्वयं च दिवसश्चास्मि काले अद्यतन इत्युक्तं महाभाष्ये॥
एवं वर्तमानः काल एकादश्यहोरात्रे उपोष्यस्तन्मध्ये दशमीप्रवेशो विद्धा सा सा त्याज्या॥ अत ए
व हेमाद्रौ दशम्याः संगदोषेण अर्धरात्रात्परेण तु वर्ज्या ये चतुरो यामाः संकल्प्यार्चनयोः सदे

लितत्रदोषः॥ चतुर्दश्यामादित्यस्य स्पर्शः॥ स्वमते तु रात्रेस्त्रियामत्वात्प्रहरत्रय एव पूर्वशेषः॥
तेन चतुर्थप्रहर एव वेधो युक्तः॥ सोप्यरुणोदय एव सूर्योदयं विनाप्येव स्नानदानादिका
क्रिया इति माधवीये पाद्मे॥ प्रत्यूषो हर्मुखं चैव कल्यमिति कोशादरुणोदयमारभ्य सूर्यास्तु घ्ते
स्तत्रैव निषेधः॥ तेन मतत्रयेऽप्यवस्थेति केचित्॥ ये मुनिकन्यायेनारुणोदयवेधस्यैव
वेस्तुतिरिति तु माधवः॥ यत्तु दिकूपं [illegible] सप्तवेधेति वेधः॥ सद्यपवासादितिरिक्तेति मा
धवः॥ सर्वप्रकारवेधोपमुपवासस्य [illegible]॥ साध्ये सप्तमुहूर्तस्तु योगो यं बाध्यते बलमि
ति॥ निगमादिष्वले॥ तत्र माधवमते वेधे सत्येवारुणोदयविद्धा साऽप्यापदा ह्येकादश्येव
शुद्धा सती वर्द्धते द्वादशी वो जयं नारदपरोपोष्या॥ एकादशी द्वादशी चाधिका चेत्सद्य

विषय

त्तोदिने॥ पूर्वत्याहिंस्तूत्तरं स्यादिति पेत्यविशेषेणाह इति माधवोक्तेः॥ स्मार्तैस्तु सूर्योदयविद्धा
साऽप्यापदा ह्येकादशी शुद्धा सती वर्द्धते द्वादशी तत्र स्मात्यन्तानाप्तदा गृहस्थैः पूर्वा यतिभि
रुत्तरा कार्या॥ प्रथमेऽहनि संपूर्णा [illegible] रात्रसंयुता॥ द्वादश्यां च तथा तात दृश्यते पुनरे
व च॥ पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो इति स्कांदोक्तेः॥ वृद्धमानोप्येवमाह॥
उपवासकृतेतु शुद्धापि विद्धा वा सर्वैर्वांपरैव॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरे
वोत्तरा कार्या परतो द्वादशी यदीति नारदोक्तेः॥ द्वादशी मात्रवृद्धौ तु शुद्धायां पूर्वैव॥ नचे
देकादशीविद्धौ द्वादशीपरतस्थिता॥ उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति नारदोक्तेः॥

द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते॥ शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृश इति माधवोक्तेश्च॥ मदनरत्नेप्येवं॥ परं तु विद्धाप्यविद्धा वोपोष्या परतो द्वादशी न चेत्॥ अविद्धापि च विद्धा स्यात्परतो द्वादशी यदीति हेमाद्रौ पाद्मवचनं॥ तदेकादश्याधिक्ये ज्ञेयं॥ तदुक्तं माधवेन॥ एकादशी द्वादशी चेत्सुनयं पंचवृद्धये यदा॥ तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनमिति॥ विद्धैकादश्यां द्वादशीमात्रवृद्धौ च सर्वेषां परैव॥ तत्रैवैकादशीमात्रवृद्धौ गृहिणः पूर्वा यतेरुत्तरा॥ पूर्वोत्तपाधोक्तेः॥ एकादशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः॥ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही इति प्रचेतसोक्तेः॥ एवं शुद्धाविद्धा तुल्यमिति

माधवः॥ त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन॥ उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति स्कांदात्॥ अविद्धानि निषिद्धैस्तु न लभ्यंते दिनानि तु॥ मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति ऋष्यशृंगोक्तेश्च॥ मुहूर्तपंचकमरुणोदयमारभ्य ज्ञेयं॥ अन्यथोत्तरेह्नि एकादश्युपवासाभावात्॥ यद्यपि हेमाद्रिणा शुद्धसमा शुद्धन्यूना वाधिकद्वादशीका चेत्सर्वेषां परैवेत्युक्तं॥ तदपि वैष्णवविषयं स्मार्तानां तु पूर्वैवेत्यविरोधः॥ हेमाद्रिमते तत्स्यते तत्र॥ शुद्धाविद्धाद्वयोर्नं दशिध्या न्यूनसमाधिक्यैः॥ षट्प्रकारा पुनस्त्रेधा द्वादश्यूनसमाधिकैरित्यष्टादशैकादशीभेदाः॥ तत्र शुद्धाधिका न्यूनद्वादशीका शुद्धाधिका समद्वादशीका च सर्वैः पूर्वा निष्कामैरुत्तरा कार्या॥ प्रथमे हरिसंपूर्णेति पूर्वोक्तस्कांदात्॥ पुनर्द्वादशीकायां तु विष्णुप्रीतिसिद्धैरुपवासद्वयं कार्यं॥ का संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत्॥ उपोष्ये द्वे तिथी तत्र वि

पुष्पीणान्तस्सरैरिति वृद्धवशिष्ठोक्तेः॥ शुद्धन्यूना शुद्धाधिका शुद्धसमा विद्धन्यूना विद्धसमा चाधिकद्वादशिका चेत्सर्वेषां परैवेति हेमाद्रिः॥ मदनरत्ने तु शुद्धाधिका परा॥ संपूर्णैकादशी यत्रेति पूर्वोक्तेः॥ अन्या पूर्वा॥ शुद्धा यदा समा हीना समा हीनाधिकोत्तरा॥ एकादशीमुपवसेन्न शुद्धां वैष्णवीमपालिस्कांदात्॥ शुद्धा एकादशी उत्तरा द्वादशी न चेदेकादशी विद्धैव इति नारदोक्तेश्च॥ यत्तु॥ अविद्धापि च विद्धा स्यादिति का पापं॥ तच्छुद्धवृद्धिपरं॥ यत्तु संपूर्णैकादशी त्याज्या परतो द्वादशी यदि॥ उपोष्या द्वादशी शुद्धा द्वादश्यामेव वि पारणमित्यादि तद्वैष्णवपरं॥ स्मार्तानां तु पूर्वैवेत्युक्तं॥ शुद्धन्यूनासमद्वादशिकात् मुमुक्षूणां पुत्रवतां च परा॥ अन्येषां पूर्वा॥ पुत्रवतोऽपि पूर्वेति मदनरत्ने॥ विद्धन्यूनान्यूनद्वादशिका च सैव सर्वैः कार्येति हेमाद्रिः॥ मुमुक्षूणां परा॥ अन्येषां पूर्वेति मदनरत्ने विद्धसमासमद्वादशिकोनद्वादशिका च मुमुक्षुभिः परा॥ अन्यैः पूर्वा कार्या॥ दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते॥ शुद्धैव द्वादशी राजन्नुपोष्या

मोक्षकांक्षिभिरिति स्कांदोक्तेः॥ मोक्षकांक्षिगृहस्थादन्येषां पूर्वैव सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः॥ प्रातर्भवतु वा मा वा यतो नित्यमुपोषणमिति पाद्मोक्तेः॥ विद्धाधिकासमद्वादशिका सर्वेषां पूर्वैव॥ पारणाहे न लभ्येत द्वादशी कलयापि चेत्॥ तदानीं दशमीविद्धाप्युपोष्यैकादशीतिथिरिति ऋष्यशृंगोक्तेः॥ माधवमते तु अत्र गृहिणः पूर्वा यतेरुत्तरा॥ विद्धाधिकान्यूनद्वादशीका मोक्षपापक्षयविष्णुप्रीतिकामैः परा कार्या॥ गृहस्थेन तु नैतत्कार्यं॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॥ उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति॥ कौर्म्ये दिनक्षये तु उपवासनिषेधात्॥ दशम्येकादशी विद्धा द्वादशी च क्षयेगता॥ क्षीणा सा द्वादशी ज्ञेया नक्तं तु गृहिणः स्मृतमिति वृद्धशातातपोक्तेश्च गृहिणः पूर्वत्रोपवासः॥ च एकादश्याः शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्याः न्यूनसमत्वयोरेकादश्यामुपवासः॥ यानि तु दशम्यनुगताहं द्वादशद्वाशीफलं॥ धर्मापत्यधनायूंषि त्रयोदश्यां तु पारणमिति कौर्मादीनि दशमीवेधत्रयोद

शीपारणयोर्निषेधकानिसानिविहितत्वान्नोपपत्तिः॥अत्र मूलवचनानि तत्तद्व्रतस्थानावसरे ज्ञेया
यत्तु कालेहेमाद्रौ॥बहुवाक्यविरोधेन संदेहो जायते यदा॥द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणमि
ति मार्कंडेयोक्तेः॥संदिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत्॥तथाधिवादेषु च सर्वेषु द्वादश्यां समु
पोषणं पारणं च त्रयोदश्यामासेवे मानवः पुने॥इति पाद्मोक्तेश्च॥वेधसंदेहेऽप्येतिथिद्वंद्वे प्रवृत्ति
५तदेसवप५ पूर्वा वा परा कार्येत्युक्तं विषयभित्स्थले बहूनां॥अर्थोऽपयुक्तं किंचिदुच्यते॥तत्र दशम्यामेकादशीवे औ
धे द्वादशीमध्ये एव भोजने कार्ये॥एकादश्यां न भुंजीतेति तस्या एव निमित्तत्वात्॥निषेधस्तु निय
तसामान्यकालमात्रमपेक्षत इति देवजानेत्वा॥केचित्तु॥एकादशीव्रतांगत्वेन पूर्वेद्युरेव मतत्विष्वा
नाद्विष्विस्पृष्टे च निषेधान्न वकृत्वात्॥नैकाम्यव्रतांगे भोजने निषेधः प्रवर्तते॥तेन एकादशी
मध्येऽपि पूर्वाह्ने भोजनमित्याहुः॥अत्राधिकारी माधवीये कात्यायनेनोक्तः॥अष्टवर्षाधिको ॥५५

पूर्णोह्यशीतिन्यूनवत्सरः॥एकादश्यामुपवसेत्पक्षयोरुभयोरपीति॥अविद्धे॥ज्ञानेऽपिचाशौचेनारीच पु
कुमेव सदा ग्रहीत्ति॥यत्तु विष्णुः॥पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्॥आयुष्यं हरते भर्तुर्न
रकं चैव गच्छतीति॥तद्भर्तुरननुज्ञाविषयमिति प्राहुः॥उपवासासामर्थ्ये तु मार्कंडेयकोर्मयोः॥ए
कभक्तेन नक्तेन तथैवायाचितेन च॥उपवासेन दानेन न निर्द्वादशिको भवेत्॥अत्र एकभक्तेत्रयोमर्थे
उपवासव्रतं चरेदित्येकभक्तादिषु उपवासशब्दस्तद्धर्मातिदेशार्थः॥तेन तत्प्रयुक्ताः सर्वे धर्माः स
ह्यकालापत्नेपि नवैति संकल्पमंत्रे चैकभक्तादिपदेनोहः कार्यमिति मदनरत्ने॥तथासामर्थ्ये प्र
तिनिधिना कारयेदिति प्रागुक्तं॥अशक्तानरते प्रायश्चित्तमाह॥माधवीये कात्यायनः॥अपर्वे पर्वव
द्रात्रौ चतुर्दश्यष्टमीदिवा॥एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति॥अथ काम्यव्रतवि
धिः॥लघुनारदीये॥दशम्यादि महीपाल त्रिदिनं परिवर्जयेत्॥गंधंतांबूलपुष्पादिस्त्रीसंभोगं

५

॥५७॥नि.सिं.

कोद्रव

महायशाः॥ तत्र दशम्यां विधिः कौर्मे॥ कांस्यं मांसं मसूरांश्च चणकान्कोरदूषकान्॥ शाकं
मधुपरान्नं च त्यजेदुपवसन्स्त्रियं॥ तथा॥ शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने॥ द्यूत
मत्यंबुपानं च दशम्यां वैष्णवस्त्यजेत्॥ पद्मपुराणे नारदीये॥ अक्षारलवणाः सर्वे हविष्यान्न
वि निषेविणः॥ अवनीतल्पशयनाः प्रियासंगविवर्जिताः॥ अतएवाह॥ हेमाद्रौ देवलः॥ अ
सकृज्जलपानाच्च सकृत्तांबूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥
अशक्तौ तु मदनरत्ने देवलः॥ असकृदपि चांबुपानेन नोपवासः प्रणश्यति॥ अस्यपेवत्रुष्टे॥ वि
ष्णुरहस्ये॥ गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यन्नि
[illegible] राकृतं॥ एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे॥ स्नेवहिंसनमोः सस्यं कृत्वा स्तोत्रं च पठेत्
सकृत्॥ प्रायश्चित्ते व्रती कुर्याज्जपेन्नामसहस्रकं॥ मिथ्यावादे दिवास्वापे बहुशोंबुनिषेवणे॥

॥५७॥

अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः॥ ॐ नमो नारायणायेत्यष्टाक्षरः॥ तत्र पैठीनसिः॥ तांबूलचर्व
णे स्त्रीसंयोगे मांसनिषेवणे॥ व्रतलोपो न चेत्कुर्यात् स्नावहुजिवर्जनमिति॥ संयोगग्रहणं तु कालादन्य
त्र रेतःसेकाभावे संयोगमात्रेन्यत्र क्षयः स्मृत इति तत्रैव कात्यायनोक्तेः॥ हेमाद्रौ वसिष्ठः॥ उपवासे तत
था श्राद्धे न कुर्याद्दंतधावनं॥ दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं॥ काष्ठग्रहणमन्यल्लोष्टाद्यपि
षेध इति हेमाद्रिः॥ विष्णुरहस्ये॥ श्राद्धोपवासदिवसे खादित्वा दंतधावनं॥ गायत्र्या शतसंपूतमं
बु प्राश्य विशुध्यति॥ निर्णयामृते व्यासः॥ वर्जयेत्पारणे मांसं व्रताहेप्योषधं सदेति॥ एकादश्यां
श्राद्धप्राप्तौ माधवीये कात्यायन आह॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्॥ उपवासं तदा
कुर्यादाघ्राय पितृसेवितं॥ मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि॥ अभ्यर्च्य पितृदेवांश्च आजि
घ्रेत्पितृसेवितमिति॥ हेमाद्रौ स्मृत्यादिसर्वनिबंधेषु पठ्यते॥ एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्य

मितियदुक्तं तत्परास्तं॥ किंच महालये॥ सपक्षः सकलः पूज्यः श्राद्धे षोडशावे प्रतीति स्मृतेः षोडशाहे॥ पो-
षैकादश्यां च मन्वादिश्राद्धं क्षयाहापरिज्ञाने च तत्स्थैकादश्यां विहितं श्राद्धं बाधितमेव स्यात्॥ यदपि स्मृ-
तिचंद्रिकास्थं पठंति॥ अन्नाश्रितानि पापानि तद्भोक्तुर्दहुरेव च॥ भुंजंति पितरस्तस्य नरके शाश्व-
तीः समा इति॥ तस्यापि रागप्राप्तभुजिगोचरस्यैवं श्राद्धगोचरयतां महलाहसमित्यलं॥ योपि-
कृतश्राद्धं निच्चयो जले पिंडं विनाकृत इति लघुनारदीये॥ एकादश्यां श्राद्धादिनिषेधः॥ समाप्तापित-
तिन्नविषयः॥ पूर्वं चाप्येतदूहणाहं निश्चयः प्रतिग्रहः॥ तंडुलो वृत्तिसंयोगात्तैलं लवणयोगतः॥
फलं त्रितयसंयोगादन्नतां च समश्नुते॥ यद्यान्यं वारिभिर्नार्द्रं पच्यते वै चलाग्निना॥ तद्यान्यं फल-
वत्सर्वं न दोषः शाकटायनः॥ शातातपः॥ शाकं वा यदि वा पत्रं मूलं वा यदि वा फलं॥ कल्पयेद्यद-
हारेण तेनैव जुहुयाद्धविः॥ शाकं वा पच्येत हव्यमेकादश्यामुपवासादिविषयं॥ न तु सार्वकालिकं॥

चिनोदकेन पक्वानि हविष्याणि च सर्वशः॥ कंदमूलफलादीनि मधुतिलानि चैव चरेत्॥ अव्रतघ्नान्या-
ह मदनरत्ने देवलः॥ सर्वभूतानयं व्याधिः प्रमादो गुरुशासनं॥ अव्रतघ्नानि पठ्यंते सकृदेतानि शास्त्र-
तः॥ स्कांदेपि॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः॥ हविर्ब्राह्मणकाम्या च गुरोर्वचन-
मौषधं॥ इदं चार्त्तिसंकष्टविषयं लघुनारदीये॥ अनुकल्पो नृणां प्रोक्तः क्षीणानां वरवर्णिनी॥
मूलं फलं पयस्तोयमुपभोग्यं भवेच्छुभे॥ न त्वेव भोजनं किंचिदेकादश्यां प्रकीर्तितमिति॥ अ-
स्यापवादः॥ शयने च पहुसाने महार्म्ये परिवर्त्तने॥ नरो मूलफलाहारी हृद्दिशल्यं समर्पयेत्॥
एतेऽन्याविरोधिनो निर्णयाः सर्वव्रतेषु ज्ञेयाः॥ तत्रैकादश्यां संकल्पः॥ गृहीत्वौदुंबरं पात्रं वा-
रिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यद्वा वाचैव धारयेत्॥ इति माधवीये नारदोक्तेः॥
अत्र मंत्रस्तु विस्मृतः॥ एकादश्यां निराहारः स्थित्वाहमपरेऽहनि॥ भोक्ष्यामि पुंडरीकाक्ष शर

॥५१॥नि॰सिं॰

णं येन चाप्नुतेति॥ शैवादीनां तु हेमाद्रौ सौरपुराणे॥ सावित्र्याप्यथवा नाम्ना संकल्पं तु समाचरेत्॥
शिवादिनामधेयोपचतुर्वेदप्रसिद्धः॥ वाराहे॥ इत्युच्चार्य ततो विद्वान् पुष्पांजलिमथार्पयेत्॥ त
तस्तज्जलं पिबेत्॥ अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं॥ उपवासफलं प्रेप्सुः पिबेत्पात्र
गतं जलमिति कात्यायनोक्तेः॥ मध्यरात्रे उदये वा दशमीरात्रौ संकल्प इति माधवः॥ दशम्याः
संगदोषेण अर्द्धरात्रात्परेण तु॥ वर्जयेच्चतुरो यामान् संकल्पार्चनयोस्तदा॥ विद्धोपवासे त
स्मिंस्तु दिने संध्यासमाहृतेः॥ रात्रौ संपूजयेद्विष्णुं संकल्पं च समाचरेदिति नारदीयोक्तेः॥ तत्रै
व पूजामभिज्ञाय देवस्य पुरतः कुर्याज्जागरं विधिवद्व्रती॥ द्वादश्यां निवेदनमंत्र उक्तः का
त्यायनेन॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भ
वेति॥ नारदीये॥ आमणेनाग्नौ जपेत् स्याद्द्वादश्याह्ने दक्षिणां ततः॥ स्कांदे॥ एकादश्येवोपवा

॥५१॥

---

आसन

सं तु योऽश्नाति द्वादशीदिने॥ नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनं॥ द्वादश्यां वर्ज्यान्याह बृहस्पतिः
दिवास्वप्नं परान्नं च पुनर्भोजनमैथुने॥ क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्॥ हेमाद्रौ
कूर्मपुराणे॥ पुनर्भोजनमध्यायो भारमायासमैथुने॥ उपवासफलं हन्युर्दिवानिद्रा च पं
चमी॥ स्कांदे॥ परान्नं कांस्यतांबूलं लोभं वितथभाषणं॥ वर्जयेदिति शेषः॥ विष्णुधर्मे॥ असं
भाष्यान् हि संभाष्य तुलस्यतसिकादलं॥ आमलक्याः फलं वापि पारणे प्राश्य शुध्यति॥ बृह
न्नारदीये॥ रजस्वलां च चांडालं महापातकिनं तथा॥ सूतिकां पतितं चैव उच्छिष्टं रजकादिकं॥
श्वानादिमन्यैश्च पापवर्धेषां ध्वनिमुत्तमः॥ अष्टोत्तरसहस्रं तु जपेद्वेदमातरं॥ एतद्भूते सू
तकेपि कार्यं॥ सूतके मृतके चापि न त्याज्यं द्वादशीव्रतमिति विष्णूक्तेः॥ तत्र स्नानं दानादि सूत
कांते कार्यं॥ सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं॥ दानं दत्वा विधानेन व्रतस्य फलम

॥ ५ ॥ नि॰ सिं॰

श्रुत इति मात्स्योक्तेः ॥ रजोदर्शनेपि कार्यं ॥ एकादश्यां न भुंजीत नारी दृष्टे रजस्यपीति पुलस्त्योक्तेः
यदा द्वादश्यां श्रवणर्क्षं तदा शुक्लपक्षे एकादशी सत्त्वात्तत्रैवोपवासः कार्यः ॥ शुक्ला वा यदि
वा कृष्णा द्वादशी श्रवणान्विता ॥ तयोरेवोपवासश्च त्रयोदश्यां च पारणमिति नारदीयोक्तेः ॥
५० एते च नियमाः काम्यव्रते नियताः ॥ नित्यव्रते सति संभवे कार्याः ॥ शक्तिमांस्तु पुनः कुर्यात्
नियमं सविशेषणमिति कात्यायनोक्तेः ॥ अशक्तस्तु माध्यंदिनीये व्रतमेव वर्ते ॥ इति विज्ञाय
कुर्वीतावश्यमेकादशीव्रतं ॥ विशेषनियमाशक्तोहोरात्रं भुक्तिवर्जितं इति ॥ अथाष्टौ महा
द्वादश्यः ॥ तत्र शुक्लपक्षे एकादशीयुता द्वादशी उन्मीलनी संज्ञा ॥ द्वादश्येव शुक्लाधिका वर्द्ध
ते चेत्सा वंजुली ॥ या[illegible]रत्रयस्पर्शिनी त्रिस्पृशा ॥ अमापर्वणः संपूर्णाधिक्ये पक्षवर्द्धिनी
पुष्यर्क्षयुता जया ॥ श्रवणयुता विजया ॥ पुनर्वसुयुता जयंती ॥ रोहिणीयुता पापनाशिनी ॥ ५०

॥ ५ ॥

३५३

एताः पापक्षयमुक्तिकामैरुपवसेत् ॥ अथ मलेहेमाद्रौ लेये ॥ एकादशी द्वादश्योरेकस्यैवैतत्रैणोप
वासः ॥ पार्थक्येतु शक्तस्योपवासद्वयं ॥ एकादशीमुपोष्यैव द्वादशी समुपोषयेदिति विष्णुरहस्यो
क्तेः ॥ अशक्तौ तु द्वादश्यामेव ॥ एवमेकादशीं सकलां द्वादशी समुपोषयेत् ॥ पूर्ववासरजं पुण्यं सर्वं प्रा
प्नोत्यसंशयमिति तत्रैवोक्तेः ॥ यदा त्वल्पा द्वादशी तदोक्तं मात्स्ये ॥ यदा भवति अल्पापि द्वादशी पा
रणादिने ॥ उषःकाले द्वयं कुर्यात् प्रातर्माध्याह्निकं तदा ॥ नारदीयेपि ॥ अल्पायामपि विप्रेंद्र द्वा
दश्यामरुणोदये ॥ स्नानार्चनक्रियाः कार्याः दानहोमादिसंयुता इति ॥ संकटे तु माध्यंदीयेद्देव
लः ॥ संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं ॥ अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदिति ॥ संक
टे त्रयोदशीकामुकप्रदोषासे ॥ अत्र केचिदाहुः ॥ अपकर्षकाम्यानां च नाहिताग्निविषयकाः ॥ अ
ग्निहोत्रादीनां श्रौतत्वेनापकर्षयोगादिति ॥ द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यं ॥

॥धा॰सिं॰सिं॰

द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः॥ तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः इति निर्णया
मृते मदनरत्ने च विष्णुधर्मोक्तेः॥ अत्र केचित्तिमिरंते॥ यदा तु यत्नी द्वादशी तदापि प्रातर्मुहूर्त
त्रये पारणं कार्यं॥ सर्वेषामुपवासानां प्रातरेव हि पारणमिति वचनादिति॥ अस्मद्गुरवस्तु॥
५२ बहूनां कर्मकालानां विनाकारणं बाधापत्तेः॥ प्रातर्मुहूर्तत्रये चैवाल्पद्वादश्यामेवापकर्षवि
धानादपराह्न एव कार्यं॥ प्रातःशब्दस्तु॥ सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति वि स्व
दपराह्नपर्याप्तियोपपन्नः॥ न च वाक्यवैयर्थ्यं॥ पुनर्भोजनसायंपारणनिषेधार्थत्वा
त्सेतौ तु॥ प्रमादेन एकादश्युपवासातिक्रमे परार्थं वासरे॥ एकादशी विष्णुत्ता चेत् द्वा
दशी परतः स्थिता॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति॥ केचित्तु विष्णुना चेति पठंति। ५२
अत्रापि शास्त्रियेषो नियमाः॥ सर्वप्रसंगेषु बोद्धव्याः॥ अन्ये च नवरात्रेवस्तं तरति दिक्॥ इति श्री

॥धा१॥

स्त्रयोदशीतुर

रामभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ एकादशीनिर्णयः॥ द्वादशी तु पूर्वैव युग्मवा
क्यात्॥ द्वादशी तु प्रकर्तव्या एकादश्यायुता प्रभो इति स्कांदात् सर्वमते शुक्ला पूर्वा कृष्णो
त्तरा॥ त्रयोदशी तिथिः पूर्वः सितो यामसितः परश्चेति दीपिकोक्तेः॥ शुक्ला त्रयोदशी पूर्वापरा
कृष्णा त्रयोदशीति माधवीयमते॥ चतुर्दशी तु सर्वमते कृष्णा पूर्वा शुक्लोत्तरा॥ उपवासे तु कृष्णापि
परेति मदनरत्ने॥ पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे ग्राह्ये॥ भूतविद्धे न कर्तव्ये द
र्शपूर्णिमे कदाचन॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात्॥ अमावास्यायो
गविशेषः॥ परार्थे शातातपः॥ अमावास्यां भवेद्वारो यदा भूमिसुतस्य वै॥ जाह्नवीस्नानमा
त्रेण गोसहस्रफलं लभेत्॥ अमावा सोमवारेण रविवारेण सप्तमी॥ चतुर्थी भौमवारेण वि
षुवत्सदृशं फलं॥ तत्रैव व्यासः॥ सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्॥ गोसहस्रफलं द

॥५२॥नि०सिं० देवत्त

दर्शास्तान्नैवेमोक्तिमात्रःतं॥ हेमाद्रौ बृहन्मनुः॥ अयणाश्चिप्रविशुद्धर्शां नाग्नीमस्त वै॥ य
थ्यमा रविवारेण व्यतीपातः स उच्यते॥ नागदेवतमा मैषामस्तकौ मतशिरः॥ प्रथम
पादद्रसन्धे॥ सर्वसर्वेषां॥ अथेष्टिकालः गोभिलः॥ पक्षान्ता उपवस्तव्याः पक्षादिरभियष्ट ५२
व्या इति॥ उपवासोन्वाधानं॥ तत्र मध्याह्ने तस्यूर्ध्वं यापर्वप्रतिपत्संधौ तद्दिने यागः॥ पूर्वाह्ने
वायमध्याह्ने यदि पर्व समाप्यते॥ उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते इति लौगाक्षिवचना
त्॥ अपराह्णेपि यागः॥ आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः॥ मध्याह्नस्तु तयोः सं
म धिर्यदावर्तनमुच्यते॥ इति मदनरत्ने वचनात्॥ मध्याह्नादूर्ध्वं संधौ माध्यंदिनमते परेद्युर्या
गः॥ अपराह्णे यावारात्रौ यदि पर्व समाप्यते॥ उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते इति लौ ५२
गाक्षिणोक्तेः॥ हेमाद्रिस्त्वपराह्णसंध्यावपि परदिने प्रतिपद्वृद्धौ चंद्रोदये च सति द्वितीया

॥५२॥

दिष्यसंततस्येसति पूर्वेद्युर्यागः॥ पर्वणोंशो द्वितीयेतु यष्टव्यं तु द्विजातिभिः॥ द्वितीयासहितं यस्मा
द्दृषयं सम्यक्लायना इति द्वितीये क्षितिवै सतिकन्यायेन तुरीयांशपरं तुरीये क्षिति शूलपाणौ पाठः
स्पष्टार्थ एव॥ तथात्र तापंचदशी पूर्णा द्वितीया क्षयगामिनी॥ चहरिश्चिरमायां स्याद्भूतेयुक्ता
दिकी त्रियेति बौधायनवचनं स्वेस्यूचिवान्॥ मदनरत्नेपि॥ चतुर्दशी चतुर्थांम्वा अमावास्यान्द्
श्यते॥ श्वोभूते प्रतिपच्चेत्स्यात्सूर्यं तत्रैव कारयेदिति॥ यत्तु माधवः॥ यस्तु वाजसनेयी स्यात्तत
स्य संधिदिनात्पुरा॥ न क्वाप्यन्वाहितिः किंतु सदा संधिदिने हि सेत्याह॥ यच्च कात्यादर्शेपि उक्तं॥ आ
वर्तनाद्ध्वः संधिर्यद्यन्वाधाय तद्दिने परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिन इति॥ यत्तु मदनर
त्ने॥ मध्यंदिनात्स्यादहर्यो हयस्मिन्प्राक्पर्वणः संधिरियं तृतीया॥ सा सर्वमेका वाजसनेयिभि
मसात स्यामुपोष्या यपरेद्युरिष्टिरिति॥ एतत्सोर्णमासीपरमिति तत्रैव॥ आवर्तनोर्ध्वमप्यग

॥५३॥नि॰सिं॰

५३

स्ताद्यास्त्रौ वा समाप्ते दे पश्चान्नादर्शोऽत्र समाप्तात्तृतीये सर्थः ॥ तत्र कर्मप्राप्ये दर्शमात्री श्रीअनंतभा
ष्यादिसकलतन्त्रास्वीयग्रंथविरोधाच्च अनादराच्चोपेक्ष्यं ॥ पौर्णमास्यां विशेषमाह कात्यायनः
संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः ॥ सा पौर्णमासी विज्ञेया सद्यःकालविधौ तिथिः ॥
अमायां विशेषमाह बौधायनः ॥ द्वितीयात्रिमुहूर्ता चेत्प्रतिपद्यापराह्णिकी ॥ अन्वाधानं च
तुर्दश्यां परतः सोमदर्शनात् ॥ कात्यायनस्तु ॥ यजनीयेह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते ॥ त
त्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातय इति ॥ एतच्च बौधायनवाजसनेयीविषयं ॥ तैत्तिरीयस्य
तो तु चतुर्दश्यां दर्शेपि याग उक्तः ॥ एषाभिस्तु मनीषाभिरिष्टिर्यामस्यां आसन्नपश्चाच्चंद्रमाऽभ्युदे प
त्यस्मिन्नेवासौ लोके पुष्टुं नयतीति ॥ अस्तंगतेपि ॥ यदहः पश्चाच्चंद्रमा अभ्युदेति तद
हर्यजन्ति मामल्लोकान्नभ्युदतीति ॥ मदनरत्नेप्येवं ॥ आपस्तंबमाध्यार्थसंग्रहेप्येवं ॥ अ

५३

॥५३॥

तः पक्षद्वयस्य समस्य तत्राधानस्यैतितद्धेतु दूषणं चान्यकालायनादिति तु पूर्णां संधिविषयमिति मा
धवः ॥ शेषपर्वणीष्टौ विशेषमाह माधवीये गार्ग्यः ॥ प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते
पुनः प्रणीय तत्रेष्टिः कर्तव्या यागवित्तमैः ॥ गृह्याग्नेर्नायं नियम इति मदनरत्ने पारिजातः
एवं पर्वांशः प्रतिपदश्च त्रयोंशाः प्राक्काल उक्तः ॥ बृहच्चित्प्रतिपत्तुर्यांशेपि यागः ॥ संधि
र्यद्यपराह्णे स्याद्यागं प्रातः परेहनि ॥ कुर्वीत प्रतिपद्भागे चतुर्थेपि न दुष्यतीति व्यूहशातात
पोक्तेः ॥ एतन्मूलेर्मापरमिति मदनरत्ने ॥ पर्वति प्रतिपदः क्षयस्य वृद्ध्याश्चार्धं प्रक्षिप्य संधि
र्वेयः ॥ तदाह माधवः ॥ वृद्धिः प्रतिपदो यास्ति तदर्धं पर्वणि क्षिपेत् ॥ क्षयस्यार्धं तथा क्षिप्त्वा
संधिर्निर्णीयतां सदेति ॥ कात्यायनोपि ॥ परेह्नि प्रतिपत्कान्यूनास्तथैव स्याच्छिकाश्चयाः ॥ क्षि
प्त्वा तदर्धं पूर्वस्मिन्ह्रासवृद्धी विकल्पयेदिति ॥ एवं स्मार्तस्थालीपाकेपि ज्ञेयं ॥ तत्रेष्टिस्थाली

॥५४॥नि०सिं०

५४

पाकाद्याधानमग्न्युत्प्रवेशश्चियहोमानंतरमाग्निर्य्यांपौर्णमास्यामारंभणीयो॥ नतुदर्शे॥ यथा
रंभेमलमासपौषमासशुक्रास्तादिसंभवतितदाप्यारंभः कार्यः॥ पाणित्तु॥ दुपरागोऽधिमासश्चयदि
प्रथमपर्वणि॥ तथामलिम्लुचेपौषेवान्वारंभणमिष्यते॥ गुरुभार्गवयोर्मौढ्येचंद्रसूर्यग्रहेत
थेति॥ संग्रहेपिचत्वारितानिकालस्यादिनातिक्रांतःशुक्रकालमारंभविषयाणि॥ नामकर्मच
दर्शेष्टिंयथाकालंसमाचरेत्॥ अतिपातेसतितयोःप्रथमेमासिपुण्यत्र॥ इत्यपरार्केगर्गवच ला
नादितिप्रयोगपारिजाते॥ तुतंत्रेचैतत्प्रयोगरत्नेप्युक्तं॥ कालादर्शेतुनामकर्मचजातेष्टिमिति
पाठः पाणिग्रहस्तु॥ आधानानंतरापौर्णमासीचेन्मलमासगा तस्यामारंभणीयादीन्नकुर्वी
तकदाचनेति॥ त्रिकांडमंडनवचनाच्छुक्रकालएवचित्रहेष्टिंकृत्वारंभंकुर्यादित्याहुः॥ का ५४
लादर्शेस्मृतिसंग्रहेपि॥ आरंभंदर्शपूर्णश्च्योरग्निहोत्रस्यचादिमं॥ प्रतिष्ठाःपंचकूर्मायाप ॥५४॥

लमासेविवर्जयेत्॥ इति॥ अथविकृतिः॥ तत्रापस्तंबः॥ यदीष्ट्यायदिपशुनायदिसोमेन
यजेतसोमावास्यायांपौर्णमास्यांचेति॥ अत्रपौर्णमास्यमावास्याशब्दात्तदंतस्यग्रहणो
ग्रहते॥ तेनतदहस्सहोरात्रेरसर्वमाहरामांडारनः॥ माधवोपि॥ इष्ट्यादिविकृतिःसर्वापि
र्वण्येवेतिनिर्णयइति॥ अत्रविशेषमाहत्रिकांडमंडनः॥ कात्यायनस्त्वि॥ आवर्तना
त्राग्यदिपर्वसंधिःकृत्स्नातुतस्मिन्प्रकृतिंविसृसाः॥ तदेवभागःपरतोयदिस्यात्सन्धिर्
न्विकृत्स्नाःप्रकृतेःपरेद्युरिति॥ कृत्स्नंत्वमावास्यादयोप्येवमाहुः॥ यदीष्टयेतिसांगाया
विकृतेःपर्वकालेहास्यसंगासाकल्येपौसंध्यप्रमितौयजेतेतिप्रकृतेः॥ प्रतिपदि
समाप्तिनियमात्प्रकृत्यनंतरंप्रतिपदिविकृत्सयोगात्पूर्वेद्युर्विकृतिरित्युक्तं॥ तंत्रर
लेपार्थसारथिना॥ यद्यपिप्रकृतेःपूर्वत्वादपूर्वमंतेस्यादित्यापस्तंबेनोक्तं॥ तथापि॥

हेतुवादेनकृतिमिलासामा
यादिगंवासमनिष्याहाराद्दिति
दप्रापाल्पमितिलक्षणायः॥
आ॥लघलोतुपिजोपंचस्यामः॥

अन्वारंभणीयातु चतुर्दश्यां कार्येति हिरण्यकेशिसूत्रे मात्रदत्तीये ॥ अन्येषां पर्वण्येव पशोः कालांतर
मप्याह ॥ बौधायनः ॥ अमावास्ययेन यो हविषेष्ट्वा नक्षत्रे चेति शुक्लपक्षे इति कादिविशाखांते पुदेव
नक्षत्रेष्विति येऽशा यस्यामीत्याचक्ष्यो ॥ चातुर्मास्येष्वपि पक्षादष्टाहं यथाप्रयोगपक्षयोर्नक्षत्रेषु प्रारं
भः ॥ यावज्जीवसांवत्सरप्रयोगयोस्तु फाल्गुन्यां चैत्र्यां वारंभः ॥ पशौ तु विशेषमाह कात्यायनः ॥
अर्धदिनोत्तरवर्तिनि यत्र पर्वसंधिः परस्तात्स्यात्तस्मिन्नहनि तु पशुं सद्य एव द्व्यहं वा ॥ आरम्भाय
प्रकृतिरथ चेत्पर्वसंधिः पुरस्तात्स्यात्तस्मिन्प्रकृतिमथ तु स्यात्पशुः सद्य एवं ॥ अधिकारप
सुस्त्रग्नीषोमीयेण सवनीयेन वा समानतंत्रो वा कार्य इति त्रिकांडमंडनः ॥ सोमे त्वाह आप
स्तंबः ॥ अमावास्यायां दीक्षा यजनीये वा मावास्यायां यजनीये वा सुत्यमहः पौर्णमास्यां दीक्षा
यजनीये वा पौर्णमास्यां यजनीये सुत्यमहरिति ॥ कौंध्यायनसूत्रेपि ॥ पूर्वपक्षस्य प्रथमेहनि

बौधाय

दीक्षेतरेष्ट्वा या नक्षत्रयोगे चेति ॥ पूर्वपक्षः शुक्लपक्षः ॥ नक्षत्रयोगे चेत्यस्यार्थः ॥ चैत्र्यादिपौर्णमा
घाश्विन्यादिनक्षत्रयोगे दीक्षेतेति ॥ आधानं तु पर्वणि नक्षत्रेषु चोक्तं ॥ तत्र पर्वनक्षत्रगार्हपत्यमादध्याती
त्यादिपर्वकालव्यापिन्याह्यं दिनद्वये तत्त्वे परं ग्राह्यं ॥ संकल्पस्य पर्वणि कालमात्रं ॥ पूर्वत्र नक्षत्रयोगे
ऽतदेव ग्राह्यं ॥ यत्र त्रीणि सन्निपतितानि स्युस्तु नक्षत्रं च पर्व तत्र मुख्यं ॥ विप्रतिषेधे ऋतुर्नक्षत्रं च बली
य इति हिरण्यकेशिसूत्रात् ॥ ऋतुर्वसंते ब्राह्मणोऽग्निमादधीतेत्यादिः ॥ रेणुकारिकायां तु ॥ माघादिषु
च मासेषु श्रावणे चाश्विने तथा ॥ मार्गशीर्षे शुक्लपक्षे आधानमथ कारयेद्दिसुतः ॥ अत्र मूलं मृग्यं ॥
आधाननक्षत्राण्याहापस्तंबसूत्रे ॥ कृत्तिकारोहिणीमृगशीर्षपुनर्वसुपुष्यपूर्वोत्तरापूर्वाषाढोत्तरा
षाढाहस्तचित्राविशाखानुराधाश्रवणोत्तराभाद्रपदा इति ॥ सोमपूर्वाधाने विशेषमाहापस्तंबः ॥
सोमेन यक्ष्यमाण आदधानो नर्तुं न नक्षत्रमिति ॥ अत्र प्रकरणादाधानकालबाधः ॥ ते

न सोमस्य वसंतकालत्वानवाध्यते॥ इति रुद्रदत्तवृत्तौ नारायणवृत्तौ चोक्तं। दर्शस्यामी तु सोमस्यापौ
यक्रतुत्वस्यापि नरूढैर्दिविति स्वनाद्युनयकालबाधं न मन्यते॥ श्रीरामांडारस्तु॥ कालांतरविधानेना
सर्वकालानादरो वेति पक्षद्वयमुक्तवान्॥ तत्राद्ये इष्टिकादिकालांतरस्य यथाध्याने वसंताद्यबाधे
न विध्यानं॥ तथा सोमेप्युदगयनपूर्वपक्षपुण्याहसन्निपातयत्नकालोनादेरा इति छंदोगसूत्रोक्तो
गदयानबाधेन सोमाग्निसंधिरूपकालांतरविधानादुदगयनं लपेक्षत इत्युक्तं॥ द्वितीयपक्षे तु य
द्दैवेनं यत्नउपनमेदिति॥ सर्वकालानादरउक्तः इति भारद्वाजसूत्रात् सर्वशाखस्य च विश्वजित्सर्वपृष्ठ
तियद्वयोरप्रयोगात्सर्वकालबाध इति तेन दक्षिणायनेपि भवतीत्युक्तं षड्गुरुभाष्ये देवत्रातभाष्ये
तेत्ररत्ले च षट्स्वपि क्रतुषु भवतीत्युक्तं इति दिक्॥ श्राद्धे त्वमावास्या त्रेधा विभक्तदिनतृतीयांशे या
पराह्णगा सा तद्व्यापिनी साग्निभिर्ग्राह्या पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते॥ वासरस्य ॥५९

२पितृणां चतत्रदा
नप्रशस्यत इ२

तृतीयांशे नातिसंध्यासमीपत इति कात्यायनोक्तेः॥ दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं॥ अपरा
ह्णेतिशाता । तत्पोक्तेश्च दिनद्वये तत्र सत्त्वे सर्वापराह्णव्यापिनी ग्राह्या॥ यद्युभयेद्युरेषविहितः स
र्वापराह्णः स्थितत्र इति दीपिकोक्तेः॥ यत्तु कार्ष्णाजिनिः स्तच्चिह्नममावास्यां कोहादशानतोपि या॥
श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते इति॥ तदपराह्णे चतुर्दशीवेधपरमिति श्राद्धहेमाद्रिः॥
अपराह्णव्याप्त्यभावपरमिति माधवः॥ दिनद्वये पराह्णव्याप्त्यभावे साम्येन व्याप्तौ च तिथिक्षये पू
र्वेति हेमाद्रिः॥ यदा चतुर्दशी यामं तुरीयमनुपूरयेत्॥ अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते॥
इति कात्यायनोक्तेः॥ चतुर्दश्याश्चतुर्थयामं दर्शः पूरयेत्॥ चतुर्दशीयामत्रयं स्यादिति सर्थः॥ क्षीयमा
णा परदिने पराह्णव्यापिनी नेत्सर्थः॥ व्यतिरेकमाह॥ वर्धमानामावास्यां लक्षयेदपरेहनि॥ या
मांस्त्रीनधिकान्वापि पितृयज्ञस्ततो नयेत्॥ ततः श्राद्धं च॥ दिनद्वये पराह्णव्याप्तौ तिथिवृद्धौ च

हारीतः ॥ त्रिमुहूर्ताच कर्तव्या पूर्वा खर्वा च यच्छ्रुतेः ॥ कुहूरप्यपरेद्युः कार्या यद्येषा सा गतिस्त्रिभिः ॥ त्रिमु
हूर्ताभावे तु पूर्वा नेत्यर्थः ॥ पिंडपितृयज्ञस्तु कात्यायनैर्यागादिना पूर्वेद्युः कार्यः पूर्वेद्यागस्यापि
उ पितृयज्ञ इति तत्सूत्रात् व्याख्यातं चैतत्कर्काचार्यैः ॥ पूर्व एव दर्शात्पिंडपितृयज्ञो न पश्चात् कुतः
अंगत्वात् ॥ तथा च श्रुतिः ॥ तस्मात्पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजंत इति ॥ पूर्वेद्युः पि अं
तृभ्यो यज्ञं निपृणीय प्रातर्देवेभ्यः प्रतनुत इति च ॥ तेन तन्मतेंगापेक्षासौ ॥ तदुक्तं ॥ अंगं वा समभिव्या
हारादिति ॥ तेन पूर्वमते चतुर्दशीयुतदर्शे पिंडपितृयज्ञ इति ॥ अनंतभाष्ये तु परेद्युरित्युक्तं ॥ अ
त्र द्वेधाप्याचारो दृश्यते ॥ आपस्तंबानां तु परदिने मुहूर्तमपि दर्शसत्वे तत्रैव पितृयज्ञः ॥ तदाहा
पस्तंबः ॥ अमावास्यायां यदहश्चंद्रमसं न पश्यंति तदहः पिंडपितृयज्ञं कुर्वत इति ॥ अस्य रुद्र
दत्तीयाभाष्ये पिंडैर्युतः पितृयज्ञः पिंडपितृयज्ञः स चरुमंतरं न तु दर्शशेषः ॥ तथा च वक्ष्यति ॥

---

द पितृयज्ञः स्वकालविधानान्नांगं स्यादिति ॥ स च यदहश्चंद्रमसं न पश्यंति पंचदश्यां प्रतिपदि वा तदहः
कुरुते यदहस्तयोः संधिस्तदहरित्यर्थ इति ॥ श्रीरामांडारेप्याह ॥ पिंडपितृयज्ञस्तु पर्वसंधिमदहोरात्रा
पराण्ह इति अतः पर्वसंधिनिर्दिष्टे पितृयज्ञः ॥ शतपथश्रुतिरपि ॥ यदैवैष न पुरस्तान्न पश्चाद्ददृशे
थ पितृभ्यो ददातीति पर्वसंधिदिने हि पूर्वतः पश्चाद्वा चंद्रो न दृश्यत एवेत्यर्थः ॥ सत्याषाढोपि ॥
पितृयज्ञं प्रक्रम्य दृश्यमाने तूपोष्य श्वो भूते यजते इत्याह ॥ हेमाद्रिस्तु ॥ अमावास्याद्वैधे तिथिप्रच
न एव पूर्वोक्तापस्तंबसूत्रे यदुक्तं न पश्यंतीति तत्राप्यभिप्रेतः ॥ अतश्चतुर्दश्यां चंद्रस्य क्षीणत्वा
त्तद्युते दर्शे पितृयज्ञः ॥ पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्निमानिति मनूक्तेः ॥ यदुक्तं यदहस्त्वेव
दर्शनं नैति चंद्रमाः ॥ तत्त्वापेक्षयाह्नेयं क्षीणो राजं चेत्यपीति ॥ यदुक्तं दृश्यमाने पितृश्चतुर्दश्य
पेक्षयेति कात्यायनोक्तेः ॥ दृश्यमानेप्यमुक्त इति गार्ग्योक्तेः ॥ यस्यां संध्यागतः सोमो मृणालपि
निर

वदंत्यपरे॥ अपराह्णे क्षयस्तस्यां पिंडानां करणं स्मृतमिति हारीतोक्तेश्च॥ चंद्रक्षयकालश्चोक्तः कात्या-
यनेन॥ अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः॥ अमावास्याष्टमेंशे तु पुनः किल भवेदणुरिति तेन पूर्वेद्यु-
रेव पितृयज्ञ इत्यूचिवान्॥ कर्कोपाध्यायैरपि अपराह्णे पिंडपितृयज्ञः॥ चंद्रादर्शनेऽमावास्यायामि-
ति कात्यायनसूत्रे दर्शनेन क्षय एवोक्तः॥ तस्मिन्क्षीणे ददातीति श्रुतेः॥ अतस्तन्मते चतुर्दशी-
युतदर्शे पितृयज्ञे सति परदिने यागोर्थात्सिद्धः॥ तदेतत्सर्वं हृष्टमपि हेमाद्रिकर्कादिव्याख्यान-
भावस्तैरेवानभ्युपगमात्कालीयबौधायनादिविषयं॥ आश्वलायनानामपि शेषपर्वणि
पिंडपितृयज्ञः॥ तथा च सूत्रे॥ अमावास्यायामपराह्णे पिंडपितृयज्ञ इति अत्र नाराय-
णवृत्तिः॥ अमावास्याशब्दः प्रतिपत्पंचदश्योः संधिवचनोप्यत्रापराह्णशब्दसमन्वयात्तत्
द्दसहोरात्रवर्तिसंधेस्तस्यापराह्णेऽह्नश्चतुर्थे भागे पिंडपितृयज्ञः कार्यः॥ औपवसथ्ये यजनीये वाह

॥यजनीये चेत्कार्य एव दक्षिणाग्निः
प्रणीयते॥

हर्निर्वपत तदहोरात्रसंधौ तिथिसंधिः स्यात्तदौपवसथ्य एवाहन्निक्रियत इति॥ अत एव मुहूर्तमप्यमावा-
स्या प्रतिपद्यपि चेद्भवेत्॥ तद्दसापक्षपंलेपे पर्वशेषं तु पर्व यदिति हेमाद्रौ वचनं पिंडपितृयज्ञपरमुक्तं॥
प्रयोगपारिजाते॥ अयं च स्मार्ताग्निमता संपूर्णे दर्शे श्राद्धव्यतिषंगेण कार्यः व्यतिषंगो नाम द्वयोः
सहानुष्ठानं॥ एतच्च स्थालीपाकेन सह पिंडार्थमुच्चसेति सूत्रे वृत्तिकृतोक्तं॥ खंडपर्वणि तु केचिदा-
हुः॥ पूर्वेद्युः पिंडपितृयज्ञव्यतिषंगेण श्राद्धं कृत्वा परेद्युः केवलः पिंडपितृयज्ञः कार्यः॥ अस्मित्कृ-
ता अन्वष्टक्यं च पूर्वेद्युर्मासिमास्यथ पार्वणं॥ काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टममिति सुद-
द्दस पूर्वेषु चतुर्षु स्थालीपाकादुद्धृत्याग्नौ करणमिति सूत्रे दर्शश्राद्धे स्थालीपाको नियत इति गम्य-
ते॥ स्थालीपाकश्च पितृयज्ञ एवेति पूर्वदिने व्यतिषंगः सिद्धः॥ प्रयोगपारिजाते तु वार्षिकश्रा-
पं द्धादेरपि व्यतिषंग उक्तः॥ किमुत दर्शश्राद्धस्य न्यायविदस्त्वाहुः॥ सूत्रस्य वृत्तेश्च संपूर्णदर्शविष-

च

यत्वात्॥ एवं ऽपर्वणि पूर्वेद्दिने केवलं श्राद्धं परदिने केवलः पितृयज्ञः कार्यः अत एवोक्तं वृत्तिकृता॥
नात्रापूर्वः स्थालीपाकश्चोपदेशे सर्वश्राद्धेषु प्रसंगादिति प्रयोगपारिजातोक्तिरप्येतद्विषयैव॥ पू
र्वेद्दिने च श्राद्धेऽग्नौकरणमेव न पाणिहोमः॥ चतुर्थ्यादिषु साग्नीनां च स होमो विधीयते॥ पित्र्य
श्रात्मणहस्ते स्यादुत्तरेषु चतुर्थ्यपीति परिशिष्टनियमात्॥ न च लौकिकाग्नौ पक्वस्य वपं गृह्याग्नौ
होमः॥ नाग्नौ पक्वस्य प्रान्याग्नौ जुहुयादिति निषेधात्॥ मेवं श्राद्धस्य गृह्यले न स्मार्ताग्नौ पचनाग्नौ
याकृतत्वात्॥ तस्मात्पूर्वेद्युः केवलं श्राद्धं न त्वतिषंगः इदमेव च युक्तं॥ आहिताग्निना तु सर्वा
ध्यानिनार्वाचीनिनावा॥ संपूर्णे खंडे वा दर्शे श्रौताग्नौ पचयागो च पितृयज्ञः कार्यो न तु दर्शे श्रा
द्धप्रतिषंगेणेति विस्तरभीतेर्विरमामः॥ संपूर्णदर्शे च विशेषमाह लौगाक्षिः॥ पक्षांतं कर्म
निर्वर्त्य वैश्वदेवं च साग्निकः॥ पिंडयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुध इति पक्षांतं चरुर्मान्वाध्या

```
[OrderDescription]
,CREATED=22.07.19 14:41
,TRANSFERRED=2019/07/22 at 14:59:27
,PAGES=35
,TYPE=STD
,NAME=S0001071
,Book Name=M-1974-NIRNAY SINDHU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
```

```
FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,
```